# .. shivastavaH 2 ..

## ॥ शिवस्तवः २ ॥

॥ शिवस्तवः ॥

SHIVASTUTI. It is known that many centuries ago India had trade and cultural links with the far eastern nations. We could see evidences of this fact even today in these countries. There are Hindu temples. Hindu festivals are celebrated. People know our puranas and epics like Ramayana and Mahabharata. The temples there contain inscriptions that contain hymns on Hindu gods and goddesses. A hymn on Shiva found in Bali, an island

near Java is given below along with some other verses on Shiva.

ॐ नमः शिवाय शर्वाय देवदेवाय वै नमः ।
रुद्राय भुवनेशाय शिवरूपाय वै नमः ॥ १॥
त्वं शिवस्त्वं महादेव ईश्वरः परमेश्वरः ।
ब्रह्मा विष्णुश्च रुद्रश्च पुरुषः प्रकृति-स्तथा ॥ २॥
त्वं कालस्त्वं यमो मृत्यु-र्वरुणस्त्वं कुबेरकः ।
इन्द्रः सूर्यः शशाङ्कश्च ग्रह-नक्षत्र-तारकः ॥ ३॥
पृथिवी सलिलं त्वं हि त्वमग्नि-र्वायुरेव च ।
आकाशं त्वं परं शून्यं सकलं निष्कलं तथा ॥ ४॥
अशुचिर्वा शुचिर्वापि सर्वकामगतोपि वा ।
चिन्तयेद्देवमीशानं स बाह्याभ्यन्तरः शुचिः ॥ ५॥
नमस्ते देवदेवेश त्वत्प्रसादाद्ददाम्यहम् ।
वाक्ये हीनेऽतिरिक्ते वा मां क्षमस्व सुरोत्तम ॥ ६॥
नमस्ते देवदेवेश ईशान वरदाच्युत ।
मम सिद्धिं भूयश्च (सिद्धिः सदा भूयात्) सर्वकार्येषु शंकर ॥ ७॥
ब्रह्मा विष्णुरीश्वरश्च महादेव नमोऽस्तु ते ।
सर्वकार्यं प्रसिध्यतां क्षमानुग्रहकारण ॥ ८॥

॥ शुभम् ॥

The following slokas are also from stone inscriptions.

नमः शब्दगुणायास्तु व्यतीतेन्द्रियवर्त्मने ।
विश्वतो व्यश्नुवानाय व्योमरूपाय शम्भवे ॥ १॥
उन्मना या सती कान्ता नितान्त-शिवसङ्गता ।
जगद्धिताय चाशास्तु सा शक्ति-रचलात्मजा ॥ २॥
जयतीन्दु रवि व्योम वाय्वात्म क्ष्मा जलानलैः ।
तनोति तनुभिः शम्भुर्योऽष्टभिरखिलं जगत् ॥ ३॥

Line one of this verse is missing

यमान्तरं ज्योतिरुपासते बुधाः निरुत्तरं ब्रह्मपदं जिगीषवः ॥१॥
तपश्श्रुतेज्याविधयो यदर्पणा$t$ भवन्त्यनिर्देश्यफलानुबन्धिनः ।
न केवलं तत्फलयोगसंगिनामसंगिनां कर्मफलत्यजामपि ॥२॥
निसर्गसिद्धैरणिमादिभिर्गुणैरुपेतमंगीकृतशक्तिविस्तरईः (रम्) ।
धियामतीतं वचसामगोचरमनास्पदं यस्य पदं विदुर्बुधाः ॥३॥
॥ ॐ तत्सत् ॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in
The text is found in inscriptions in the Far East lands of Java and Cambodia.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 25, 2006